# संस्कृतवार्ता:

दिनाङ्क :- 19.05.2025 सायम् :- 06:20

आदौ-मुख्यवार्ता:

- भारतेन विश्वस्य खाद्यभाण्डागारत्वेन समुदेतुं लक्ष्यम् उपस्थापितमस्ति इति ब्रूते केन्द्रीय-कृषि-मन्त्री शिवराज-सिंह-चौहान: ।
- विदेश-विषयाणां संसदीय-स्थायि-समिते: उपवेशनं सम्प्रति प्रचलति, यत्र विदेश-सचिव: विक्रम-मिस्री समित्यै भारत-पाकिस्तानयोर्मध्ये संजात: सैन्याभियानस्य अनन्तरम् साम्प्रतिक-वैदेशिक-नीतिविषये विवरणानि प्रयच्छति।
- रोमानिया-देशे यूरोपीय-संघ-समर्थकेन प्रत्याशिना मध्यमार्गिणा "निकुसोर डैन" इत्यमुना राष्ट्रपतिपदस्य निर्वाचने जार्ज सिमियन इत्याख्यं प्रतिद्वन्द्विनं पराभूय विजयोऽधिगत:।
- बलुचिस्थाने कार-बम-विस्फोटे न्यूनातिन्यूनाः चत्वारो जनाः पञ्चतां प्राप्ताः सन्ति।
- आईपीएल क्रिकेट क्रीडा-स्पर्धायां, लखनऊ-सुपर-जायंट्स-दलेन अद्य सायं लखनऊ-नगरे सनराइजर्स-हैदराबाद-दलस्य साम्मुख्यमस्ति विधेयम् एतद्धि महत्त्वपूर्णं द्वन्द्वं वर्तते।

---

चौहान: -विकसितकृषिअभियानम्

केन्द्रीय-कृषि-मन्त्री शिवराज-सिंह-चौहान: प्रावोचत् यत् अस्य मासस्य एकोन-त्रिंश्यां समस्ते देशे विकसित-कृषि-संकल्प-अभियानम् आरप्स्यते। अभियानमेतद् जून-द्वादशीं यावत् चलिष्यति। एतस्य अभियानस्य उद्देश्य: कृषकेषु आधुनिक-प्रौद्योगिकीनां नवीन-बीजानां च प्रकाराणां विषये जागरूकता-समुत्पादनं वर्तते। अद्य नव दिल्ल्याम् एकस्मिन् वार्ताहर-सम्मेलने वार्त्ताहरान् सम्बोधयन् श्री-चौहान: प्रत्यपादयत् यत्

एतद् अभियानं समस्त-देशस्य त्रयो-विंशत्युत्तर-सप्त-शत-मितेषु जनपदेषु चलिष्यति। अथ चैतद् अभियानम् प्रायः सार्धैक-कोटि-मितान् कृषकान् यावत् प्राप्स्यति। अमुना भणितं यत् वैज्ञानिकानां एक: समूह: प्रायः पञ्च-षष्टि-सहस्र-ग्रामाणां यात्रां कृत्वा कृषकान् व्यावहारिकं वैज्ञानिकं च कृषि-कर्म-विधानं प्रशिक्षयिष्यति।

एस/बी-शिवराज- अभियान संरचना

श्रीचौहान: न्यगदत् यत् कृषि: भारतीय-अर्थव्यवस्थाया: मूलस्तम्भः वर्तते, यद्धि भारतस्य प्रायः अर्ध-जन-सङ्ख्यायै आजीविकामपि प्रददाति। देशस्य खाद्य-सुरक्षाया: आधारोSपि भवति। अनेन प्रोक्तं यत् प्रधानमन्त्रिण: नरेन्द्र-मोदिन: नेतृत्वे विकसित-भारतस्य निर्माणार्थम् एकं परिवर्तनकरम् अभियानं प्रचाल्यते। एतस्य अभियानस्य अन्तर्गतं उत वा अभियानस्य केन्द्रे "विकसित-कृषि:, समृद्ध-कृषका:" इति लक्ष्यमस्ति। श्रीचौहानेन एतस्मिन् विषयेSपि प्रकाश: प्रक्षिप्त: यत् भारतस्य लक्ष्यं विश्वस्य खाद्य-भाण्डागारं भवितुम् अस्ति।

--------------------------------------

विदेश सचिव-विक्रम मिस्री

विदेश-सचिव: विक्रम-मिस्री भारत-पाकिस्तानयोर्मध्ये संजात: सैन्याभियानस्य अनन्तरम् साम्प्रतिक-वैदेशिक-नीतिविषये संसदीय-स्थायि-समिते: समक्षं समाख्यां प्रस्तौति। एतस्यां समाख्यायां इदमपि सम्भाव्यते यत् असौ काङ्ग्रेस-सांसदस्य शशिथरूरस्य अध्यक्षता-युक्तायै समित्यै अपि जायमान-ऑपरेशन-सिंदूरस्य, ततश्च पाकिस्तानेन सह युद्धविरामस्य घोषणाविषयेऽपि सूचना: प्रदास्यति।

--------------------------------------

यूरोपीय-राजनीति:

यूरोपीय-राजनीतौ, यूरोपीय-संघ-समर्थक-प्रत्याशिभि: दलै: च सप्ताहान्ते सम्पन्नेषु निर्वाचनेषु रोमानिया-पोलैंड-पुर्तगाल -देशेषु उल्लेखनीया अग्रता अधिगता वर्तते।

-------------------------------------

## रोमानिया-राष्ट्रपति:

रोमानिया-देशे यूरोपीय-संघ-समर्थकेन प्रत्याशिना "निकुसोर डैन" इत्यमुना विजयोऽधिगतो वर्तते। ह्यः सम्पन्ने राष्ट्रपति-पदस्य द्वितीय चरणस्य निर्वाचने अमुना चरम-दक्षिणपन्थिनं राष्ट्रवादिनं जॉर्ज सिमियन वर्यं पराजित्य निर्णायक: विजय: अधिगतः अस्ति, यद्धि व्यापक-रूपेण भू-राजनीतिक-जनमत संग्रहत्वेन विलोक्यते।

-------------------------------------

## बलूचिस्तान-विस्फोटः

बलुचिस्थाने कार-बम-विस्फोटे न्यूनातिन्यूनाः चत्वारो जनाः पञ्चतां प्राप्ताः सन्ति। विंशतिरन्ये च व्रणीभूताः सूच्यन्ते। पाकिस्तानस्य बलुचिस्तान-क्षेत्रस्य सीमा-वर्तिस्थाने किला-अब्दुल्ला-इत्याख्यस्य गुलिस्तान-क्षेत्रे एषः विस्फोटः दुरापन्नः आसीत्। प्रतिपाद्यते यत् एषः विस्फोटः गुलिस्तान-नगरे क्वेटा-चमन-राष्ट्रिय-राजमार्ग-स्थिते जब्बाराख्ये व्यापारिकापणे दुरापन्नः आसीत् ,यद्धि पाकिस्तानस्य फ्रंटियर-कॉर्प्स इत्यस्य दुर्गेण समं संलग्नमस्ति, भीषण-विस्फोटेन क्षेत्रस्य नैकानि आपणानि वाहनानि च विनष्टीकृतानि सन्ति,सहैव दुर्गस्य भित्तिका चापि भृशं क्षतिग्रस्ता वर्तते स्थानीयजनैः प्रतिपाद्यते यत् नगरे भूरि-आपणेषु विस्फोटक-कारणेन अग्निकाण्डमपि दुरापन्नम्। ध्येयमस्ति यत् प्रतिबन्धित-आतङ्कि-गुल्मेन तहरीक-ए-तालिबान-पाकिस्थान(टी.टी.पी) इत्यनेन अस्य विस्फोटस्य उत्तरदायित्त्वमङ्गीकृतमस्ति।

-------------------------------------

## जयशंकर-यूरोपयात्रा:

नीदरलैंड, डेनमार्क, जर्मनी चेति त्रयाणां देशानां यात्राप्रसङ्गे निरत: विदेश-मन्त्री डॉ. एस. जयशंकर:। नीदरलैंडस्य हेग-मध्ये रणनीतिक- विशेषज्ञै: सह उपवेशनम् अकरोत्। तदनु अमुना भणितं यत् सह विशेषज्ञै: सह परस्परमं विचारणां विनिमयं कृतवान्। विदेश-मन्त्रालयेन ह्य: षट् दिवसीय-यात्राया: कार्यक्रमस्य घोषणा विहिता आसीत्। यात्राया: अवसरे, विदेशमन्त्री देश-त्रयस्यापि नेतृभि: साकं मेलिष्यति। असौ स्वीय-समकक्ष-मन्त्रिभिः समं द्विपक्षीय सम्बन्धानां, परस्पर-हितानां, क्षेत्रीयाणां वैश्विकानां च विषयाणां सम्पूर्ण-प्रकल्पेषु चर्चा: करिष्यति। एषा यात्रा भारतस्य प्रवर्तमानानां कूटनीतिक गतिविधीनां भागभूता वर्तते यस्या: उद्देश्य: रणनीतिक सम्बन्धानां सुदृढीकरणं प्रमुख-यूरोपीय-सहभागिभि: देशै: साकं सहयोग-वर्धनम् अस्ति, येषु रणनीतिक साहमत्यं, व्यापार:, निवेश: चापि सन्ति समाहिता: ।

-------------------------------------

सर्वकारीयाभासीयापण: - कार्यकार्यधिकारी

सर्वकारीय ई-मार्केटप्लेस इत्याख्यम् आभासीयापणकेन्द्रम् विश्वस्य बृहत्तम- कुशल-सार्वजनिक ई-क्रय-माध्यमेषु एकतमत्वेन समुदितम् अस्ति, येन प्राप्ति- विषये आपणिक-सामर्थ्ये च नूतनानि मानकानि स्थापितानि सन्ति। जी.ई.एम. इत्यस्य मुख्य-कार्यकारी अधिकारी मिहिर-कुमार: जी.ई.एम. इत्यस्य अष्टम-स्थापना-दिवसस्य अवसरे नव-दिल्ल्याम् एकं वार्ताहर-सम्मेलनं संबोधयन् एतत् सर्वं प्रत्यपादयत्। श्री कुमार: प्रावोचत् यत् जी.ई.एम. इत्यनेन दश-लक्षाधिका: सूक्ष्म-लघु-मध्यमोद्यमान्, लक्षाधिकान् कर्मकरान्, शिल्पकारान्, तन्तुवायान्, महिला-उद्यमि-जनान् च स्टार्टअप प्रकल्पत्वेन संयोजिता: सन्ति ।

-------------------------------------

भारतीय-ऋतु-विभाग:

भारतीय-ऋतु-विज्ञान-विभागेन आगामि-पञ्च-दिनानि यावत् केरल-कर्णाटक-गोवा-महाराष्ट्रेषु अतिवृष्टेरनुमानं कृतमस्ति। अथ च अग्रिमेषु पञ्च–षड्-दिनेषु पूर्वोत्तरभारते

हिमालयक्षेत्रेषु बङ्गालसिक्किमयोश्चापि मेघगर्जनेन तडित्-स्फुरणेन च सह अतिवृष्टेः सम्भावना अभिव्यक्तास्ति। अद्यारभ्य एतस्य मासस्य द्वाविंश-दिनाङ्कं यावत् पश्चिम-राजस्थाने प्रचण्ड-निदाघ-लहरीणां सम्भावना वर्तते। अथ च ओडिशायां अपि प्रचण्ड-घर्म-मयस्य वातारणस्य सम्भावना वर्तते।

---------------------------------------

बीसीसीआई-निषेध:

भारतपाकिस्तानदेशयोर्मध्ये जायमानस्य सैन्यापीडस्यानन्तरं भारतीय-क्रिकेट्-परिषदा ऐशियायि-क्रिकेट-परिषदः द्वयो: प्रमुखस्पर्धयो: भागग्रहणात् पृथग्वर्तनस्य निर्णय: कृत:। एषा स्पर्धाद्वयी च वर्तते महिला-इमर्जिंग-टीम इत्याख्या एशिया-चषकीया स्पर्धा, पुरुष-वर्गीया एशिया-चषकीया स्पर्धा चेति।

---------------------------------------

शीर्षन्यायालयस्य न्यायाधीशानां निवृत्तिभृतकम्।

एकस्मिन् महत्वपूर्णे निर्णये, शीर्षन्यायालयेन अद्य प्रोक्तं यत् समेषामपि न्यायाधीशानां पेंशन इति निवृत्तिभृतकम् उच्च-न्यायालयानां अतिरिक्त-न्यायाधीशै: सहितेभ्य: न्यायाधीशेभ्यश्चापि प्रदास्यते । एते सर्वे पूर्ण-निवृत्ति-भृतकस्य, सेवा-निवृत्ति-लाभस्य च अधिकारिणो भविष्यन्ति। शीर्षन्यायालयेन प्रोदितं यत् उच्चन्यायालयस्य पूर्व-मुख्य-न्यायाधीशेभ्य: निवृत्ति-भृतकस्य रूपेण प्रतिवर्षं पञ्चदश-लक्ष-रूप्यकाणि प्रदास्यन्ते। न्यायालयेन प्रोक्तं यत् एतेभ्यः निवृत्ति-भृतकस्य नैव प्रदानं संविधानस्य चतुर्दश-अनुच्छेदस्य अन्तर्गतं समानताया: अधिकारस्य उल्लंघनं भविष्यति।

---------------------------------------

जम्मू-कश्मीर-त्रिरंग-ध्वज-यात्रा:

जम्मू-कश्मीरे एकताया: भ्रातृत्वस्य सौहार्दस्य च अद्भुतं प्रदर्शनम्। देशभक्ति-भावनाभि: ओतप्रोतेन भाजपा-दलेन अद्य कठुआ-क्षेत्रे ऑपरेशन सिंदूर इति सैन्य-अभियानस्य उत्कृष्ट-सफलताया: उत्सवम् मानयितुं त्रिरंग-ध्वज-यात्राया: आयोजनं कृतम्। अस्माकं वार्ताहरो वर्णयति यत् यात्रायामस्यां दलस्य वरिष्ठ-नेतार:, कार्यकर्तार:, समर्थकाश्च भूरि संख्यायां सहभागितां कृतवन्तः। येन कठुआ-क्षेत्रस्य हृदयं त्रिरङ्ग-ध्वजस्य सागरे परिवर्तितं जातम्। त्रिरंग-ध्वज-यात्राया: नेतृत्वं वरिष्ठ-भाजपा नेता डॉ. निर्मल-सिंह: अकरोत्, तेन साकं कठुआ-क्षेत्रस्य विधायक: डॉ. भारत भूषण: अपि अवर्तत।

-------------------------------------

जो-बिडेन कर्करोगः

प्राक्तन: अमेरिकीयो राष्ट्रपति: जो बिडेन: प्रो-स्टेट कैंसर इत्याख्येन कर्क-रोगेण ग्रस्तः सूच्यते। तस्य कार्यालयेन एकस्मिन् वक्तव्ये प्रोक्तं यत् श्री-बिडेन: आक्रामक-कर्क-रोगेण निपीडितो वर्तते। प्रधानमन्त्रिणा नरेन्द्र-मोदिना जो बिडेनस्य स्वास्थ्य-विषये चिंता व्यक्तीकृतास्ति । सामाजिक-सञ्जालीये सन्देशे श्रीमोदी श्रीबिडेनस्य स्वास्थ्य-लाभाय कामनां कृतवान्। अमुना लिखितं यत् तस्य संवेदना: प्राक्तन-अमेरिकीय-राष्ट्रपते: पत्न्या डॉ. जिल बिडेन-वर्यया, तस्य परिवारेण च साकमस्ति।

-------------------------------------

आईपीएल-स्पर्धा

अद्य भारतीय-क्रिकेट-लीग-प्रतियोगितायां लखनऊ-सुपर-जायंट्स-सनराइजर्स-हैदराबादयोर्मध्ये प्रतिस्पर्धा लखनऊ-नगरस्य एकाना-क्रीडाङ्गणे सायं सार्ध-सप्तवादने भविष्यति।

सनराइजर्स-हैदराबाद-दलं पूर्वमेव प्रतिस्पर्धात: बहिरस्ति, एतन्मध्ये लखनऊ-सुपर-जायंट्स इति दलं कथमपि आत्मानं स्पर्धायां सजीवं स्थापयितुं प्रयत्नं विधास्यति।

।। इति वार्ता: ।।